A.C. Joshi Library
P.U. Chandigarh

MSS No. 36 Subject

Name of MSS Bhāgavad

Author N.A

Period N.A Folios

Script SANSKRIT Source

Missing Folios

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

...डा॥दावस्सरात्योव
...त्रिवायवो संख्याववांडुप्रत्राणांवः
...मिवसात्यायमारस्थनिहिप्रिमा
...दि...वादि...
...मिम्रकेणवक्रोराज्ञोमहापद्यं॥१॥इदानी...
श्रीसूतउवाच॥ विडरस्तीर्थयात्रायां...
तः॥यावतःकृतवानश्वप्रश्नान्द्रष्टानां...
नातेहक्षाधमेडत्रःमहाडज्ञः॥ह...
नीत्रगहृपी॥अन्याश्च जामयः...
सनाम्नविविवत परिष्वंगाविव...
नामतनपरिग्रहांतंखक्कवंत...
...ख्यानंततोऽर्जुनागमनंततः...
...नं शाडमिष्टं सर्वं येन तः...
यस्यप्रतःपश्चाद्रिवव...
तःपरंनविजिज्ञासितव...
तवइतिकृतत्रिन्मूर्खो...
...ति नवहवाविरहेणय...
...समेवमतिसवः॥कोरा॥श्रीदयोनिय...उनसाम्मिमावहृतपयोवि
...तराविवशाः॥

ॐ तपोभिःक्षीणपापानां

श्री॥१

36

MS-36

Ms-36

मुनार

पाहा॥ जयतीति ... जीवानां निवासः आश्रयः॥ तेषु वा नित्यं वसति अंतर्यामितया स्म

ः यदुवराः परिवत्सर ... मेव करूपाय स्मा इच्छामात्रेण निरसन समर्थोपि क्रीडार्थं

ः अधिकारिविशे ... मानेपत्तमेव वृंदावन तरुगवादीनां संसारदुःखहंता॥

...नां च सुस्मितेन श्रीमता मुखेनैव कामदेवं वर्द्धयन्॥ कामश्चासौ देवश्चेति वि

...त्सर्थः॥४८॥ तत्तत्कार्यविशेषैः स्वीकृत मत्स्य कूर्मादि नानामूर्त्तिः॥ विशे

...दुपाद॥३॥ ॥मन्त्र श्रीकृष्णकथाश्रवणकीर्तनध्यानेनैवर्द्धितयानु ओकृष्णधाम वैकुंठं प्राप्नोति३

मरीतेण१ ऽःस्व१ मनुकोशीपि२

...र्भिरसम्पन्नं धर्मांकितर चरहजिनघ्नः सुस्मित श्रीमुखेन॥ व्रजपुरवनि

...यापूर्त लीलातनोर्मोहनुरूपविडंबनानि॥ कर्मणा लोकमर्मकषणानिय

...तयानुसवर्मोधिनया मुकुंदश्रीमत्कथाश्रवणकीर्त्तनचिंतयेति॥

...दर्थाः॥५०॥ चित्रं न चैतत्कुरुगोपविचित्रलीलाविध्वस्तकल्मष

...नं क्षितिभुजोपि यथापुरेदर्थाः॥५१॥ योगोवर्द्धनभूधरं करधृतं

...पदः॥ यैश्चक्रे निजशासने हरविरंचाखंडलादीन्सुरान्नु

...वत महापुराणे दशमस्कंधे श्रीकृष्णलीलाचरितानुवर्ण

...रे कृष्णस्य स्त्रीनाम ... तन्नेवित्रमिसर्गः॥४॥

...गोपि चरितामिश्रपात गृणुयादि सर्गः॥ ...

...स्यातानिहृष्टेन तस्य धाम लोकमेति॥ ला

...श्री परमानंद समताद्धामाश्रया॥ श्री

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

...द्वादावसरोलोक... [illegible] ...यपरीक्षिज्जन्मवर्णितोध्यायो... [illegible]
...द्वितीयाध्याये संक्षेपच पांडवानां वंशे कुलकथोदयमिति प्रतिहाय पांडवानां राज्याभिषिक्ताय...
...नां ...ध्यायमारभ्य निरूपितमिदानीमुपोद्घातकथा भवादस्य पूर्वकं इति । अथ ...नेति...
...दिष्ट... ...याविदुरस्य ...तेणाभ्यां ॥ निर्गमोष्टतरा ...स्य विदुरागमः त्रयोदशो ...
...केण ...कं राज्ञो महाप्रस्थानं ॥ इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन् विदुरागमनेन ...
...सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ज्ञात्वा ...ज्ञात्वा ...भरं तया ...प्त विविक्षि-
त ॥ यावतः कृतवान् प्रश्नान् ...कोपारवायतः ॥ जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ तं बंधु-
मागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ ...तराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ गांधारी द्रौपदी ब्रह्मन् सुभद्रा
चोत्तरा कृपी ॥ अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं ॥ अभि-
संगम्य विधिवत् परिष्वंगाभिवादनैः ॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः ॥ राजा तमर्हयांचक्रे कृ-
तासनपरिग्रहं ॥ तं भुक्तवंतं विश्रांतमासीनं ...सुखमासनेप्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ॥
...ख्यानं ततो ...तानागमनं ततः पांडवप्रख्यानं च निरूपयति ॥ विविरध्यायैः ॥ गतिं हरिं तया ...दा मं...
...तं ज्ञात्वा ... सर्वं येन ...देवा...यावतः कर्मयोगश्च ... ...प्रथमं कृतवान् ... ...कोपारव ...स्मै
...तः ...ग...र प्रश्नार्थ ...मात्रेण गोविंदे जातैकभक्तिः कृतार्थः ... ...प्रश्ने ...परराम त-
तः परं न विजिज्ञासितवान् ...सूतः संजयः ॥ शारद्वतः कृपः ॥ कृपी द्रोणपत्नी ॥ जामयो भगिन्यो ॥ अन्याश्च स्त्रियः ॥ प्राणं
तन्व इति ... ...दिदीपतः प्राणे ...ते ...करांग्यौदयो ... ...विश्लेष ...तेयथो...
...तं ...वा विरहेण यदौत्कंठ्यं तेन कातरा विवशाः ॥ श्री॥ १

प

= पक्षिणो ह्यपत्यानि यथा ऽ तिस्नेहेन पक्षच्छायया दधंति तद्वत् त्वयुष्मत्पक्षपातच्छायया समेधिताः इत्यन्वयः अ
स्मान् किं स्मरथ समेधितत्वमेवाह विपद्गणात् यद्यस्मात् मोचिताः स्मो वीडुभ्रान्तिः कया वृत्त्या वर्तितं दे
हवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति भवतां च तीर्थाटनं न युक्तं किं तु तीर्थान्युष्मद्धार्याणि

= युधिष्ठिर उवाच ॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणात् विषाग्न्यादेर्मोचि
प६ ता यत्समातृकाः ॥ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भू
तले ॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो तीर्थीकुर्वंति तीर्थानि स्वांतःस्थेन गदाभृता ॥ अपि नः
सुहृदस्तात बांधवाः कृष्णदेवताः ॥ दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥ इत्युक्तो धर्मराजेन स प६
र्वं तत्समवर्णयत् ॥ यथानुभूतं क्रमशो विना यदुकुलक्षयं ॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुप
येरक्ष स्थितं नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं ॥ भ्रा
तुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥

मलिनानि

त्याह मलिनजनसंपर्केण तीर्थानि मलिनानि संति पुनः स्वयं तीर्थीकुर्वंति स्वांतं मनः तत्रस्थेन स्वस्यांतःस्थितेनेति वा ॥
अपि किं सुखमासते न वा किं कापि दृष्टाः श्रुता वा यदुकुलक्षयावर्णने कारणमाह नन्विति अप्रियं तत
भवद्विधा इति ।२ स्वयमुपदिशत् ।

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्य ३

नतु शूद्रोऽसौ कथमुपदिशेत्। न ह्यसौ शूद्रः किंतु यमस्य रूपेणासीत्। किं तत्र कारणं। यमेचाज्ञाते अस्तुत्र
कोदंडधरस्तत्यपेक्षायामाह। अविप्रहृदिति। हृतवानित्यर्थः।। मांडव्यस्य शापात्। बाल्ये कचिच्चौरा न तद्धावंतोर
ज्ञसत्तामांडव्यस्यैकाक्षे स्वपश्चरतः समीपे ते तान्न संप्राप्य ते न महत्तित्वध्यानीय राज्ञे निवेद्यत तदाज्ञयाम वाड्
शूलमारोपयामासुः।। ततो राज्ञा तस्य चिह्नं ज्ञात्वा शूलादवतार्य प्रसादयामास। ततो निर्यमं गत्वा कुपितः
वाचा कस्मादहं शूलमारोपितः इति। ततोक्तं त्वं बाल्ये शलसंक्ष्णाग्रेण विध्य क्रीडितवानिति। तच्छ्रुत्वा मां

अविप्रदर्यमादंडं यथावद्दत्तकारिणे। यावदहार शूद्रत्वं शापाद्वर्षशतं यमः।। युधिष्ठिरो लब्धरा
ज्यो हृष्टात्मा पौत्रं कुलंधरं। प्राप्य सिलोकपालास्ते स्वं स्वं पदं परया श्रिया।। एवं ग्रहे श्रुमक्षानां प्रमत्तानां नित
दीहया।। अत्यक्रामदविज्ञातः कालः परमदुस्तरः।। विदुरस्यद्दत्तिः प्रेत्य दृष्टतरा ह्यम साषतां गृहं ज्ञिर्गम्य
तां शीघ्रं पश्ये दत्तयमाग्नानां प्रतिक्रियां न यस्यै हदुतन्त्रिक ह्दि चित्यसो संप्रलग्नावाकालः सर्वे पांनः
समागतः।। ।।

डव्यस्य शापाद्बाल्ये अज्ञानतो मे महानंदंडं यत्तत्त्वं कारितवान्।। अतः शूद्रो भवेति। इदानीं राज्यापकर्षं नि
रूपयति दुःखेत्कर्षं निगमयति। युधिष्ठिर इति। कुलंधरं वंशधरं। तदीहया गृहव्यापारेण प्रमत्तानां। अत्यक्रामद
आयुः कालोऽतिक्रांतः। यदा तान्न त्यत्तवदित्यर्थः।। अतिप्रेत्य ज्ञात्वा। तत्प्रतीकारः क्रियतां। किंनिमित्तमिने नत
त्राह। प्रतिक्रियेति। सर्वेषामिति। येः प्रतिकर्त्तव्यं तेषामपीत्यर्थः।। ।।

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

कथं धनादिभिर्वियोगः सोढुं शक्यः अत आह येनेति। अभिपन्नः अभिग्रस्तः। अत्रावस्थानमतिदैन्यमिति
दर्शयन् वैराग्यमुत्पादयति। पितृभ्रातृतिसमलिः। आत्मा च देहः। येन तु आहतः सन्नेनमीमेन दत्तं पिंडं
गृहपालवत् गृहपालः श्वा निःसृष्टः अग्निः गरो विषं हृषिताः अवमताः। तद्धैरेवन्नादिभिर्लब्धैः असु
भिः कियत् त्वया जीवनेन किंचिदित्यर्थः। तथापि एवं दैन्यमनुभवतो विपरीतेच्छा ययातगतस्वार्थं यशोधर्मादि

= येन त्वैवासिपन्नोऽयं प्राणैः प्रियतमैरपि जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः॥ पितृभ्रातृ
५७ सुहृत्पुत्रा हतास्ते विगतं वयः। आत्मा च जरया ग्रस्तः परगेहमुपाससे॥ अहो महीयसी जन्तोर्जीवि
ताशा यया भवान् भीमेनावर्जितं पिंडमादत्ते गृहपालवत्॥ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दू
षिताः॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत्॥ तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः॥ प ५७
रैत्यनिच्छतो जीर्णो जरया वाससी इव॥ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः॥ अविज्ञातगति
र्जह्यात् स वै धीर उदाहृतः॥ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान्॥ हृदि कृत्वा हरिं गेहात् प्रव्रजे
त्स नरोत्तमः॥ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान्॥ इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः॥

सुन्वा मुक्तबंधनः त्यक्ता निमानः॥ कृतान्तः इत्यविज्ञाता गतिर्यस्य सः॥ धीरः प्राज्ञः॥ स्वस्मात् स्वयं सहनेन मु
क्तिप्राप्तेः॥ नरोत्तमस्ततः प्रावोवहत प्रतीकारः स्वकालवशात् एव परतः परोपदेशतो वा। त्वं तु नरोत्तमो नासि अ
त इदानीं धीरो भवेत्याह। अथेति। अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः॥ गुणान् धैर्यदयादीन् विकर्षति आच्छि
नत्तीति तथा॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

= आजमीढः अजमीढवंशजः ॥ प्रज्ञाचक्षुः अंधः । एवंबोधितः मया दृष्टिमान् चित्रदार्ये । तस्मात् त्वया संद
र्शितः अस्मात्तमोऽर्कयोर्मार्गे यियासुः । सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिं
मनुजगाम । कथं साक्षु कुमारी हिमादिदुःखवर्जलं हिमवंतं गता । अत आह । न्यस्तदंडानां प्रहर्षो

= एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः ॥ छित्वा स्वेषु स्नेहपाशान् द्रढिम्नो नि
श्चक्राम भ्रातृसंदर्शिताध्वा । पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी । हिमाल
यं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारः । अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिल
गोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च ॥ तत्र संजयमासीनं प
प्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥ अंबा वा हतपुत्रार्ता पितृव्यः क्व ग
तः सुहृत् ॥ अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया ॥ आशंसमानः शमलं गंगायां दुःखितोऽपतत् ॥
पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥

यस्मिन् रतानां दुःखदमपि केषां चित्स्वहर्षहेतुर्भवतीत्यत्र दृष्टांतः ॥ मनस्विनां शूराणां युद्धे सततीव्रः प्रहारो यथा
...वां तुरस संप्रहारं युद्धं यथेति ॥ कृतमैत्रं मित्रदैवत्यं संध्यावंदनं येनानत्वा सेहजपपितरौ विदुरश्च तराज्ञो ॥ हे ॥
गावल्गणे गवल्गणस्य पुत्र संजय ॥ अकृतप्रज्ञे मंदमतौ शमलं अपराधं आशंसमानः आशंकमानः ॥ भार्यया सह ॥ यौ
अरक्षतां तौ इतः स्थानात् ॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

सप्रयाह्मे देवैरुक्तस्तथाप्यात्मवित्तः आत्मज्ञस्य वेदसारस्य अपशोकविरहकर्षितश्च हृतसंज्ञः प्रभुं शरणं गतः
त्मनात्मध्यात्मानं मनो विष्णुरूपं ध्येयं युक्त्यात्मसौहृदं तरा ज्ञस्य व्यवसितं निश्चयं यतो मुनि
तं वंदितोऽस्मि एवं कश्चित्कालं शोचति तस्मिन् अथ नारदः आजगाम आश्रमात् क्लिष्टं चित्तं शोकेन तं तं ड
स्य यथासंप्रदायं ध्यात्वा ध्यायतो शोकवेगाद् दत्तस्य तत्त्वं यत्प्रियाहराजानं तत्त्वस्य यत्सोऽहं वेदवेद्य अपारे शोकार्ण
वे तद्वाक्य ॥ सप यासोऽहं वेदकथा स्तुतो विरहकर्षितः ॥ आत्मेश्वर मच्च दाणेन स्यान्नाहं तिपीडि
तः ॥ विष्णुरूपः श्रुतिपाणिरूपो विष्णुत्वात्मानमात्मना ॥ अज्ञात शत्रुं प्रसूते प्रशोः पादाम्बुजस्मरणः ॥ सं
५ डयन्वाच ॥ नाहं वेदव्यवसितं पित्रोर्वः कुलनंदना ॥ गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभि
आघात मामगाव नारदः सहस्तुंबुरुः ॥ प्रत्युत्थायाभिवाद्याह सा नुजोऽभ्यर्चयन्निव मुनिं ॥ युधिष्ठि
र उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः ॥ अंब वा हतपुत्रार्ता क्व गता च तपस्विनी ॥ कर्णधा
र इवापारे भगवान् पारदर्शकः ॥ अथाबभाषे भगवान् नारदो मुनिसत्तमः ॥ मा कंचन शुचो राजन् यदीश्व
रवशं जगत् लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह
इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ॥ (श्लो०७)
वेदागावाइत्वमेव पारदर्शकः ॥ अतो ब्रूहीति शेषः ॥ आदावेव यथाशक्त्या कथनेन शोकेन मूर्छितः पदे दिविस्थ
मनसो क्त शोकमुपशमयति । कंचन माशुचः मा शोचः केवलं तान्नेवायद्यस्मादीश्वराधीनं जगत्सर्वदे
लोका श्रुतिः सहस्रौपारतंत्र्य स्तत्का संयोगवियोगयोरप्याह ॥ यथेति ॥ क्रीडोपस्कराणां क्रीडासाधनानां ॥
नसी युनक्ति नु तानिसएववियुनक्ति वायथा गावो नसि प्रोतास्तंत्या बद्धाः स्वदामभिः वाक्तंत्यां नाम भिर्बद्धा वहंति
बलिमीशितुः ॥
मसंयुक्तिसंयाजकनिविसुनाके ... तियोजयतीव गावो नत्ती वर्दतं ... तंत्यां बद्धो नसि ... श्रोता स्वामिनो बलिं वह

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

च उद्देशेऽवशिष्टानि दृष्टारात्रावि शंकितः ॥ अष्टौ त्रोदर्शनात्कृष्णतिरोधानमितीयते ॥ श्रीकृष्णस्य चेति चकारेण
निःश्रायं च ज्ञातुं कति चित्तां सप्त तदा कालातिक्रमः प्रवितो द्वारकातः न श्रायाल्लनागतः । निमित्तानि गत्या च वक्र
रुद्धहो युधिष्ठिरः । घोरां तदेवाह । विपर्यस्ता ऋतुधर्मा यस्मिन् तस्य वार्तां जीविकां क्रोधलोभा इति

= श्रीसूत उवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया । ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचे
ष्टितं । व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥ काल
६० स्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ॥ जिह्मप्रायं व्यवहृतं २२
शाठ्यमिश्रं च सौहृदं । पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणां । ६०
लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥ युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्ष
या । ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥ गताः सप्ताधुना मासा भीमसेन तवानुजः ॥ नायाति क
स्य वा हेतोर्नाहं वेदेदमंजसा ॥ अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः ॥ यदाऽऽत्मनोऽङ्गमाक्रीडं भग
वानुत्सिसृक्षति ॥

२२
नामायेषां । जिह्मप्रायं कपटबहुलं व्यवहृतं व्यवहारः शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यं । पित्रादीनां परस्परं
कल्कनं कलहादि अत्यरिष्टानि अत्यंतमशुभानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमं वचनमि
कस्माद्धेतोर्नायातीत्यहं न वेद्मि अपि किं यदा आत्मनः आक्रीडं क्रीडासाधनं अंगं मनुष्यनाट्यं उत्स्रष्टुमिच्छति स का
लः ॥
६

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

यथा

= तस्मिन्महाविशाने तिष्ठास्यां आत्मानमहंकारास्यं स्थूलदेहाद्वियोज्यविज्ञा नात्मनि तु श्री संयोज्य
की स्वातंविज्ञानात्मानं हरणशाद्वियोज्य क्षेत्रज्ञे इष्टरि प्रविलाप्य तं च क्षेत्रज्ञं शुद्धशाद्वियोज्य आधारे आत्म
यस्मिन्ब्रह्मणि प्रविलाप्य घटांबरं घटोपाधे र्वियोज्य यथा महाकाशे प्रविलाप्यते तद्वत् शुद्धानानावमाहात्मि
तौ अंतर्गणको माद्वावहिरिंद्रियविक्षेपाद्वा शुद्धानं न वेत्तत इत्ययं तस्य नास्तियत इत्यो मायागुणानादद
र्कः तत्स्वरं फलं वासनायस्यानि रुद्धानि करणानि च त्रुरादीनि आशयो मनश्चयस्य अतएव निवर्तितअखिल

= ता नानात्मनि मंयोज्य क्षेत्रज्ञे प्रविलाप्य तां ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ब्रह्ममायागुणो
दकोनिरुद्धकरणाशयः॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाऽचलः॥ तस्यां तरायो मैवाभूत्संन्यस्ता
खिलकर्मणः॥ स वा अद्यतनाद्राजन्परतः पंचमेऽहनि कलेवरं हास्यति स्म तत्स्मीन्न विष्यति ।
स्यमानस्य पत्युर्देहे पत्युः पत्नी सहोटजे वहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ विदुरस्तु तदाश्चर्यं
निशाम्य कुरुनंदन हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः॥ इत्युक्त्वाऽथारुहत्स्वर्गं नारदः सहतुंबुरुः ॥
युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः॥ ॥ इति श्रीमागवते महापुराणे प्रथमस्कंधे त्रयोदशोऽध्यायः॥

आत्मानो योगेन इंद्रियैर्विषयाहरणं वा येन सः॥ स्थाणुरिवनिश्चल आस्ते तथापि तन्मध्याने तं स घतं प्रत्याहारस्थे निश्चि
तयो विघ्नमेवाभूदित्यडामनः ज्ञानदसा दर्शनमपि ताव ऊर्ध्वामिति घतं प्रत्याहारस्य वा अघतनाद्रम्यः स्व प्राधीनं तर्हि तस्य
कार्यम मिथ्यामिते त्याहाल तस्येति । तर्हि मार्गानय माय माथिध्या मिनेत्याहाप तुहदेहे सहोटजे पर्णशालासहितं योगाग्नि
= नाम दग्धा हं पत्याद्विति दह्यमानेन स्य पत्ना वहिः स्थिता सती तं पतिमनु अग्निं वेक्ष्यति । तर्हि विदुरान यनाथ न तद्यमेव
सेत्याहा विदुरस्तु तनिशाम्य हर्षशोकादाशु गोतामहं तं स्व नाशोक श्चता मात्यागुरुः न तस्मात्तस्मा मातीर्थानि से विवित्रं
पादिपकिं हर्षशोका ॥ ॥ प्रथम ॥ प्रवेक्ष्यति ॥१२

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अस्माकं सर्वं शुभप्राप्त्यर्थं त्वं हेतुः श्रीकृष्ण ॥ अतश्च हि योगं विना निश्चितं स्यादित्याशयेनाह यस्मात्त्वं श्रीकृ
ष्णाद्दितोः एतच्चोपरिष्टाद्दर्जेन स्पष्टीकरिष्यति । लोकाश्रयहेतुकारणाद्रूपोर्थं यस्मात्तु ग्रहात्त्वं हृत्स्थं संनि
हितं नोऽस्माकमाशंसतां तत्तावद्दैहिकानां मानसानि लिङ्गैः ॥ ऊर्ध्वादयो वामाः स्फुरंति वेपथुः कंपश्च
हृदये वर्त्तते एतन्मह्यं आरात्संनिहितं विप्रियं दास्यंतीति सोमानाह ॥ मां द्वैस्त्रिभिः ॥ शिवाक्रोष्ट्री आदित्यमभि

य स्यात्रः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः ॥ आसमद्य सपत्नविजयो लोकाश्रयदत्तु ग्रहात्वा पश्यो
त्पाता नरव्याघ्र दिव्यान्भौमान्स्वदैहिकान् दारुणान् शंसतोऽदूराद्भयं नो बुद्धिमोहनं ऊर्ध्वक्षिवाम
तो मत्स्यं स्फुरंत्यंग पुनः पुनः ॥ वेपथुश्चापि हृदय आराद्दास्यंति विप्रियं ॥ शिवैषोद्यंतमादित्यम
भिरौत्यनलानना ॥ मां मां सारमेयोऽयमभिरौति निस्वीनवत् ॥ शस्ताः कुर्वंति मां सव्यं दक्षिणं पश
वोऽपरे वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ मृत्युदूतः कपोतोऽयं उलूकः कंपयन्मनः ॥ उ
लूकश्च कुक्षानैरनिद्रौ शून्यमिच्छतः ॥ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः ॥ निर्घातश्च महांस्ता
सीस्माकं च स्तनयित्नुभिः ॥ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ॥ परोति
रोतीत्यत्र सूर्याभिमुखं क्रोशति । अनलानना अग्निं मुखेन वमंती ॥ आगाहेती समाम मभिलक्ष्य सारमेयः ॥ आक्रोशति
अलीनवशानिः शंकं शस्ताः गवादयो मां सव्यं वामं कुर्वंति अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति वाहाश्च अश्वाः । उ
यं कपोतो मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकः तत्प्रतिपक्षी घूकः काको वा कुक्षानैः कुत्सितशब्दैर्नि
द्रं शून्यमिच्छतः ॥ धूम्राः धूम्रमरा दिशाः परिधयः इवाग्निं लोके माहुः एवं ॥ दिव्यानाह सार्द्धस्याः ॥ निर्घातो निरभ्रवज्र
पातः स्तनयित्नुर्वोऽजागर्जितानि ते ... त्रिभो ... ॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नारदीयेऽलेयतोः शास्त्र ... मंडले २

अष्टकुरक्षं ग्रहाणांमर्द्दंमंत्रुद्धांप्रतान्नद्यान्तुचराः तद्यागा॥ सद्रुक्तैः श्वामितेश्राक्षिलिः सद्भिः ।तो दसी
घावापृथिव्यौज्वलिते दीप्ते इत्यत्र पृश्येति ।भुवनौ मानना ।बानघ इतमार्द्दै श्रिलिः श्रातिर्मामनामिचंडस्यंती
तिकर्मकर्तृ यर्षिनप्रद्धवंतीत्यर्थः ।देवतानिप्रतिमाः श्रघंडुःखंप्रते ।हृष्वानविघते अन्ये भुभुवरुभ्रुश्रोर्द

= अष्टस्वर्वति जलदावीलक्ष्मिव सर्वतः। द्दुर्य्यंहतपत्ततं पश्य ग्रहमर्द्द मिथ्योदिवि। मसंकुलैर्भृतैः
६१ अतौर्ज्वलिते इव रोदसी ।नद्योनदाश्च कुलिताः सरांसिच मनांसि च ।नज्वलत्यग्निराज्यमेन कालोऽयं
किंविधास्यति। न पिबंति स्तनं वत्सा न डुह्यंति च मातरः ॥ रुदंत्यश्रुमुखा गावो न हृष्यंत्यृषभा व्रजे॥
दैवतानि रुदंतीव स्विद्यंति प्रज्वलंति च ॥ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥ भ्रष्टश्रियो निरा
नंदाः किमघंदर्शयंति नः॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः। अनन्यपुंसः श्रीर्त्रिलिहीनाभूर्हृत ६२
सौभगा॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा ॥ राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः ॥ तं
पादयोर्निपतितमयथापूर्वमातुरं। अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः॥ विलोक्योद्विग्नहृदय
ता को यो विच्छायमनुजं नृपः॥ पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं॥ युधिष्ठिर उवाच॥ ॥ कच्चिदानर्त्त
पुर्यां नः स्वजनाः सुखमासते। मधुभोजदशार्हार्हाः सात्वतांधकवृष्णयः॥

कांक्षणादिशोनायेषां तैर्भगवतः पदैः हीनाभूरित्यहं मन्ये तस्य राज्ञः इत्येवं दृष्टानि अरिष्टानि येन तेन चेत
सा चिंतयतः सतः। अयथापूर्वं निपतितं । तद्देवाह। आतुरमित्यादि श्रय। विंदून् अश्रूणि नेत्राभ्यां विच्छायं तमि
त्यर्थः। उद्विग्नं कंपितं हृदयं यस्य विच्छायं विगतकांतिं स्वजनानां बांधवाः॥ ^ श्रपो विंदून् ।१

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ना२ तथापि२

= किं वक्ष्यतीति शंकया व्यवहितक्रमेणोपृच्छति शूरइत्यादिना ॥ मारिषः मान्यो मातामहः ॥ आनकदुंदुभिः व
सुदेवः ॥ स्वसारः परस्परं वसुदेवं क्षेमे तासामपि क्षेमं दृ ष्टमेवेंष्टथग पृच्छति ॥ स्वयमिति ॥ आहुकः उ
ग्रसेनः ॥ असत् पुत्रो यस्य ॥ अतएव जीवनमात्रमेव पृष्टं अनुजः सदेवकः ॥ हृदीकसुतः कृतवर्मा ॥ जयंतादयः

= शूरो मातामहः ॥ कच्चिदास्ते सुखं मारिष ॥ मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः ॥ सप्त स्व
सारस्तत्पत्न्यो मातुलान्यः सहात्मजाः ॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं ॥ कच्चिद्राजाहुको जीव
त्यसत्पुत्रोस्य चानुजः ॥ हृदीकः ससुतोऽक्रूरो जयंतगदसारणाः ॥ आसते कुशलं कच्चिद्ये च शत्रुजिदाद
यः ॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः ॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥ गंभीररयोऽनि
रुद्धो वर्द्धते भगवानुत ॥ सुषेणश्चारुदेष्णश्च सांबो जांबवतीसुतः ॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभा
दयः ॥ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ अपि स्वस्त्या
सते सर्वे रामकृष्णभुजाश्रयाः ॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ॥ भगवानपि गोविंदो ब्रह्म
ण्यो भक्तवत्सलः ॥ कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥

कृष्णभ्रातरः ॥ सर्ववृष्णीनां मध्ये महारथः ॥ गंभीररयः युद्धे महावेगः ॥ वर्द्धते मोदत इत्यर्थः ॥ श्रीकृष्णस्याप
त्यानि कार्ष्णयः तेषु प्रवराः ॥ सुनंदनंदशीर्षण्यो मुख्यो येषां ते ॥ भगवानपि सुखमास्ते इति प्रश्नस्यानौचित्य
माशंक्याहाउरइत्यादि ॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नगवतोऽत्रावस्थाने हि लोकानां मंगलं नान्यथेत्याशयेनाह्लाच उक्तिः॥ मंगलायतस्त्रायायाः क्षेमाय लब्धपा
लनाय त्मवायत्वड्भवाय॥ अनंतसरवः बलस्तइमहायाः अर्चिताः सर्वैः पूजिताः परमानंदं यथा भवतीति म
हापोत्सविकाः वैकुंठनाथा उच्चराः यस्य पादस्रुसूषणामेव स्वव्यंतप आदिष्टं यं यत्कर्म तेन मत्त्वलामा
दयाः संख्येषु हे श्री कृष्ण बलेन निर्जित्य तदा शिवः देवलोकपात्पारिजातादीनाब्जाछ्वस्ता वद्दमा

भरतनद्र

मंगलाय च लोकानां क्षेमाय च लवायवाश्चाश्लेयद्भक्तलां लोधा बाधोऽनंतसुखाः उमा आयक्षा इत्यालि
ः२ अदं दैर्गुण्यायांबद्धर्याय दवोऽर्चिताः॥ क्रीडंति परमानंदं महापोत्सविकाः स्वायत्पादभुशुष मितापार
ाण्यकर्मणा मत्यादयो ह्यष्ट महप्रयोचिताः॥ निर्जित्य संख्ये त्रिदशांसदाशिवो हरंति वत्रोंद्र जातीदय
ववल्लीचिताः॥ यत्त्वाङ्घ्रिदंडाप्सुदयाउजीविनो यभुपवीराद्यऽकृतो सयामुक्तः॥ अत्रिक्षमंत्यं ६१
त्रिलिराहतांबलाः सत्तां उधर्मा पुरसन्नमोचितां कश्चिन्नो नामयंतातपत्र ष्टे ज्ञाविताः सिद्धोऽत्र ल
ब्धमानोऽवधातः किं वा तान चिरोचिताः॥

शचीतन्यादउचिताः यत्त्वाङ्घ्रिदंडप्रसादोपजीविनः उधर्मामंत्रि निरविञ्चाप्यंति मनोविंदः उरवमाम्नोक्ति
गतपंचमश्लोकेनाह्वयाः इदानीं तस्यैव कुशलं पृच्छति कच्चिदिति पंक्तिः अनामयं आरोग्यं नल स्वो मानो
येन वंध्य स्यात् सकाशात् हा किंवाते प्रभुतरवधाताः तिरस्कृताः यत आत्रिरैश्चिताः बहुकालं तत्र स्थिताः॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

अद्भुतमीहामात्तरितिं उरटं सुवर्णं स्फुरत्सुरटमौलियं स्याप्सितमश्रीत्यादित्य स्येतीनिश्च त्ययः॥ अपीच्यं
अति सुंदरं दृश्यत इति दर्शनं रूपं यस्य तडिद्धाससीयस्येति श्याममिति त्विषदाल्यां विघुष्टं तमेघोपम
द्युतिना॥ अद्भुतं च विकारां तमं दाहोत्तीर्णयकांचनेतन्मये कुंडले यस्य कृतजाक्षं संदलादत्यारक्षणे चं।
अत्र तेजो विषमं तं विनाशयंतं नीहारं हिमं गोपतिः सूर्य इवासंनिकर्षे समीपे ददर्श दृष्ट्वा च अमो कर

= मात्तुर्गसंगतो वीरः स तदा त्वग्रनंदनो ददर्श उमन्घंकं विदूह्यमानोऽत्र तेजसा॥ अंगुष्ठमात्रममलं
स्फुरत्सुरटमौलिनं॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुं
डलं॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं॥ परिभ्रमंतमुल्कालं भ्रामयंतं गदां मुहुः॥ अस्त्रतेजः
स्वगदया नीहारमिव गोपतिः॥ विधमंतं संनिकर्षे पर्यैक्षत क इत्यसौ॥ विधूय तदमेयात्मा भगवा
न् धर्मगुप् विभुः॥ मिषतो दशमास्यस्य तत्रैवांतर्दधे हरिः॥ ततः सर्वगुणोदर्के सानुकूलग्रहोद
ये जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा॥

[illegible]पर्यैक्षत इति तर्कितवान्॥ अमेयात्मा कथं तद्विधूतवान् नित्यवितर्क्यरूपः॥ धर्मं गोपायतीति धर्मगुप्॥ दश
मास्य[illegible]रिक्षेघमस्य तस्य मिषतः पश्यतः यत्र दृष्टः तत्रैवांतर्हितः न त्वन्यत्र गतः॥ यतो विभुः सर्वगतः॥ उदर्कं उत्तरं
फलं सर्वगुणानामुत्तरोत्तरविकाससूचके लग्ने तत्र हेतुः॥ अनुकूलैरन्यैर्ग्रहैः सहितानां [illegible]ग्रहाणामुदयो
यस्मिन्॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नृ२

= जातकं ज्ञातकर्म मंगलं ब्राह्मणाहो वराजश्रेष्ठाः शवनं शोचनस्यमन्यथा बवञ्छिघतेनालं तावन्नाभोति हुतकस्य
छेनालेततः स्वस्त्यौं हुतकं ऽविधीयत इति स्वचनात्ततः हं ज्ञाहाला आसानं वा प्रज्ञातीर्थं उत्रीय लिउण्य
वालो उत्रे जाते व्यतीपाते दत्तं सवति चाकृत्यमिति स्मृतेः। देवाश्च पितरश्चैव उच्चे जाते हि द्विजन्मनो। आयां
ति हिस्पत्रे ब्रह्मणाहमिति वाश्च वशः। हे पौरवर्षभ कुरूणां कुरुवंश्यानां क्षुले ऽल्पे अस्मिन् इह जातं दैवे

= तस्यप्रीतमना राजा विप्रेभ्यो धौम्यप्रमुखादिभिः। जातकं कारयामास वाचयित्वा च मंगलं। हिरण्यं गाः म
५४ ग्रामाश्च हस्त्यश्वान्नृपतिर्वराक्षाप्रादास्वन्नं च विप्रेभ्यः प्रज्ञातीर्थे सतीर्थविलोलतस्नु ब्राह्मणाः ५५
राजानं प्रश्रयानतं। पवयस्य स्मिन्प्रजातं ते कुरूणां पौरवर्षभ। दैवेनाऽप्रतिघातेन शुक्ले संप्रत्युपस्थि
विरोतो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना। तस्मान्नाम्ना विष्णुरात इति लोके भविष्यति। नि ५
तेन संदेहो महाभाग वृत्ते नामहाभाग। उविधि रुवाच॥॥ ब्रह्मवंश्यान्नर्षीणां शोकानम
नः। अनुवर्तिता द्विधयशसां साधुवादेन सत्तमाः॥ च१ ब्रिवोऽनुग्रहार्थाय यस्मात्प्रभव नद्दील
नाकथंभूतेनाऽप्रतिघातेन दुर्वारेण। संस्थानाशं उपेयुषि गतेसति वोऽनुग्रहार्थाय यस्मात् ... महाभागवतश्रेष्ठो महाकुल
नश्री विष्णुनारातो दत्तः तस्मात् लोके विष्णुरात इति नाम्ना ख्यातिं महाभागवत ... विख्याती ... भविष्यति
नाम ... इति तं राजानं ब्राह्मणाः ... रिति ... महाभागवतो विख्यातो ... परमभागवतः॥
अपि ... साधुवादेन यशसां समकीर्त्या अनुवर्तिता ... विख्यातो ... परमभागवतः

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

...न्तस्य तस्य ... स्तीत्याह । यत्र दिति । असद्धा... देहादिसेवातः ततस्थैः ... तद्गुणैः प्रकृतिकार्यैः ... गुणैः ...
...तस्यापि संबंधेन नापि न युज्यत इति । यत्र देवशास्त्येशनो (ईशनं) ईश्वरत्वं ... स्थोऽपि न ... ईश्वरत्वं ... बुद्धिर्न युज्यते तदाश्रया ...

= तत्रैव स्त्रीसंगादिभिः संसारप्रतीतेः कथं भगवान् तीर्ण इत्युच्यते तत्राह । उद्दामेति द्वाभ्यां । यासां उद्दामः गंभीरो यो
भावोऽभिप्रायः तस्य पिशुनः सूचकोऽमलो वल्गुः सुंदरो हासो व्रीडावलोकश्च तैस्ताभिर्निहतः । अमदनः । अपि महादे
वोऽपि संमुह्य स्वलज्जया चापं पिनाकं अजहात् । एवं प्रभावाः स्त्रिय इत्येतावद्भिर्वक्ति । यस्य भगवतो मोहि
तो रूपेण महेशोऽपि मोहित एव प्रताश्च ताः विलासा एवेति तथोक्ताः । कुहकैः कपटैर्विभ्रमैः । यस्येंद्रियं मनो
विमथितुं न शेकुः ॥ तं श्रीकृष्णं अयं प्राकृतो लोकः । आत्मौपम्येन स्वसमादृशेन संगिनं मनुजं मन्यते अज्ञ
हेतुः । व्यापृण्वानं यथा प्रियमाणं । यतोऽयमबुधः । अतत्त्वज्ञः । अतत्त्वपेक्षायामैश्वर्यलक्षणमाह एतदिति । ईशस्ये

= उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां । संमुह्य चापमजहात्प्रमदोत्तमास्ता
यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं । आत्मौपम्येन मनु
जं व्यापृण्वानं यतोऽबुधः ॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदात्मस्थैर्यथा बुद्धिस्त
दाश्रया ॥ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः । अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ इति श्रीमद्भागवते

नमैश्वर्यं नाम तदेवाह किं तत् ईशनं प्रकृतिस्थोऽपि तत्स्थाप्यगुणैः सुखदुःखादिभिः सदा न युज्यत इति यतः । यथा आ
त्मस्थैः आनंदादिभिः । आत्माश्रयाऽपि बुद्धिर्न युज्यते तद्वद्वा वैषम्ये दृष्टांतो वा । आत्मस्थैः स्वप्रकाशादिभिर्यथा
तत्स्थैः आनंदादिभिः । एवं वा अस्मदादिदेहः । तत्रस्थैर्गुणैः । तदाश्रया बुद्धिः तदुपाधिर्जीवो युज्यते एवं प्रकृतिस्थोऽपि न
बुद्धिर्युज्यत इति । एवं वा अस्मदादिदेहः । तत्रस्थैर्गुणैः । तदाश्रया बुद्धिः तदुपाधिर्जीवो युज्यते एवं प्रकृतिस्थोऽपि न
युज्यत इति यतः । एतदीशनमीशस्येति । तत्त्वतोऽपि तस्य तत्त्वेन ज्ञानं ... त्याह । तं स्त्रैणं आत्मवश्यं रहः एकां
तेऽनुव्रतं अनुरक्तं च मेनिरे । अबला मूढाः । अप्रमाणविदः । प्रमाणमियत्ता महिमानमजानंत इत्यर्थः । ईश्वरं क्षेत्रज्ञं मतयः
स्वाधीनं स्ववशं योगिनं मन्यते तद्वत् ... यथा तासां मतयः कल्पनाः । तथा तमीश्वरं स्त्रैणादिरूपं मेनि
रे इत्यर्थः ॥ ॥ अथ मे एकादशः ॥ ॥ स्क १

प्रथा १

स्क० १ यथा ... अध्याय ११ ...

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ऽशेषकोशयत्र संगायते गोविंदं हादिविश्वराला ... शेषतदेवा यः परीक्षिज्जन्म ... एवंतेनाः ॥ परीक्षितो यथा
... कर्मविलापयनं संक्षेपावपांडुपुत्राणां ... कृष्णकृपोदयमिति प्रतिज्ञाय परीक्षिता ... राज्य ... तिहपिता
... सप्तमाध्याय मारभ्य निरूपिता इदानीं ... इति कथ्यते ... दशवके ... इति ॥ अश्वत्थामा ...
... विशिष्टे न तस्य जन्मेत्या दिकुरुदिग्भ्रमरेणा वधः ॥ स परीक्षितःकेल्य देहेल्यक्ता ... प्रार्थये नला ...

= शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा । उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥
१२ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः । निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ तदिदं श्रोतु
मिच्छामो गदितुं यदि मन्यसे । ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ सूत उवाच ॥ अपीपलद्धर्म
राजः पितृवद्रंजयन्प्रजाः । निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ संपदः क्रतवो लोका महि
षी भ्रातरो मही । जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्वि
जाः । अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥

... गदितुं यदि मन्यसे तर्हि ब्रूहीति यस्य ज्ञानमदाच्छुक इति श्रवणेच्छायां कारणं ॥ निःस्पृह
या मीत्याह ... अपीपलदिति त्रिभिः ...
... पिताः श्रीकृष्ण ... अपीपलद्दितिप ...
पित् ... वदपीपलत्पालयामास ॥ क्रतवः ... पार्जिता लोकाः ॥ सुरस्पार्हाः सुराणां स्पृहणीयाः ... कं
मा क्षिप्रया राज्ञः किं सुखं प्रीतिं विधिजह्रुः ... अर्थः ... उक्तं ... मनो ... क्षुधितस्य ... कम
... न ... स्वर्ग ... रत्ना ...

म॰

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

स्थनाय २   न ३

= प्रजानामविता रक्षकः ॥ मानवः मनोः पुत्रः ॥ ब्राह्मणेषु हितः ॥ सत्यप्रतिज्ञश्च श्रीरामो यथा ॥ उशीनरदेशाधिप
× तिः शिविः येन स्वमांसं दत्त्वा शरणागतः कपोतो रक्षितः ॥ ज्ञातीनां ज्ञातीनां यच्चिन्तां च यशो विस्तारको दौष्मन्तिर्भ
रतस्त्वा अर्जुनयोः पार्थकार्त्तवीर्ययोः ॥ हिमवानिव सतां निषेव्यः ॥ अग्न्यगातिकद्वे नवद्वेवन्निति कुः क्षन्ता

= ब्राह्मणानुः ॥ ॥ पार्थ प्रजानां विता मासा ज्ञातिर्हिक्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्य
× था ॥ एष दाता शरण्यश्च यथा ह्यौशीनरः शिविः ॥ यशो वितनिता श्रीमानीदौष्मन्तिरिव पञ्चनां यत्विनाम श्र
श्रीरेष तुल्यश्चार्जुनयोर्वीर्ययोः ॥ क्षन्ताशङ्ववद्धर्षे सत्वद्रुद्रवद्रुद्रः ॥ सूर्योऽद्रुद्रवविक्रांतो निषेव्यो हिम
वानिव तितिक्षुर्वसुदेवात्सोम हि सः ॥ पितरौ विवौ पितामह सममः साम्ब्यो प्रसादे गिरिशोपमः ॥ आश्रयः
सर्वभूतानां यथा देवो रमाश्रयः ॥ सर्व सदृगुणमाहात्म्य एष कुलमतुव्रतः ॥ रंति देवश्चवोदारो यया तिरिवधा
र्मिकः ॥ दृत्याविलिसमः कुलप्रह्लाद इव सद्गृहः ॥ आहवैषोऽश्वमेधानां वृष्णानां पर्युपासकः ॥ राजधीमा
न यितासाम्राज्योत्थ यामिनीनां ॥ निग्रहीता कलेरेष धुवो धर्मस्य कारणात् ॥ तद्गृकादात्मनो मुत्युं हि जडु
त्रोपसर्जितान् ॥ प्रएस्य तं उपसृत्य सुकृक्षसंगाः पदं हरेः ॥ जिज्ञासितात्मयाथात्म्यो मुनेर्व्यास सुतादसौ ॥ हित्वे
दं स्वपगंगायां यास्यत्यऽद्धाऽकुतोभयं ॥
श्री व्यामाता पितरौ विव समहिम्नः ॥ पितामहो ब्रह्मा तेन सममः साम्ये सम्बन्धोरमाश्रयो हरिः ॥ सर्वैः सद्गुणैर्येन्मा हात्म्यं त
× स्येव श्रीकुलवल्पाः ॥ सद्गुह इवः ग्रहः अनि निवेशी यस्मा ॥ आहर्ता कर्ता ॥ हिजपुत्रेणप्रेरितात्तक्षकात् आत्मनो मृत्यु
उपसृत्यहरेः पदं प्रपस्यते नलिष्यतिन्तद्वालिख... तमात्मनो याथात्म्यं येन सः ऽद्वंशरीरं गंगायां हित्वा अकुतोभ

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ध्यायापचितिः पूजा येः परीक्षिदिति नाम ... यस्मात्प्रभुः समर्थः महाराजे दृष्टं पु
रुषं अनुध्यायन् इह दृश्यमाने भुवने भ्यः मध्ये ... परीक्षेत अयमसौ भवेदिति नो वा इति हि
वारयेदतः परीक्षिदिति ख्यातः पूर्वं दृष्टमिति वा पाठः शुक्लः शुक्लपक्षे यथा उडुपः चन्द्रः यथा का
ष्ठाभिः पंचदशकलाभिः आपूर्यमाणो वर्द्धते एवं पितृभिः युधिष्ठिरादिभिः कामैश्च पुष्टिकलाभिश्च

इति राज्ञ उपादिश्य विप्रा जातककोविदाः॥ लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान्गृहान्॥
स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः॥ पूर्वं दृष्टमनुध्यायन्परीक्षेत नरेष्विह॥ स राजपु
१५ त्रो ववृधे आशु शुक्ल इवोडुपः॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं॥ यक्ष्यमाणोऽश्वमे
न ज्ञातिद्रोहजिहासया॥ राजा लब्धधनो दध्यौ नान्यत्र करदंडयोः॥ तदभिप्रेतमालक्ष्य भ्रातरोऽच्यु
तचोदिताः॥ धनं प्रहीणमाजह्रुः उदीच्यां दिशि भूरिशः॥ तेन संभृतसंभारो धर्मपुत्रो युधिष्ठि
रः॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं॥ ३४॥ इति श्रीभागवते प्रथमस्कंधे द्वादशोऽध्यायः॥॥॥

यक्ष्यमाणो वक्ष्ये पूर्वमपहृत्य प्योक्तादश्वमेधावसरे सप्रकारं कथयति। ज्ञातिद्रोहस्य हानेच्छया य
क्षमाणः॥ करदंडयोरन्यत्र ताभ्यां विना न लब्धधनः॥ दध्यौ चिंतयामास। करदंडस्य परिज्ञानलक्षणमात्रोपक्षी
णत्वात्॥ प्रहीणं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः॥ संभृतसंभारः संपादितयज्ञोपकरणः॥ भी
तो ज्ञातिद्रोहात्॥ ३४॥ प्रथमे द्वादशः॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

तेषु विदितेषु धृतराष्ट्रः धृतराष्ट्राद्वैश्यायां जातः। गौतमः कृपः यमौ नकुलसहदेवौ अन्याश्च स्त्रियः मत्स्यसुताज्ञया
तन्मयाः पुनर्गृहं गताः सैरन्ध्रीककृष्णविरहे मोहाच्छिक्यारूढयशा मत्स्यसुता सत्यवती ...। तेषां कृष्णविरहात् सहसा
के कुत्यन्नायेनाहो मसंगताहितिद्वाख्यां। सतां संगाद्वेतोर्मुक्ताः पुत्रादिविषयोद्भवः संयोगे न सः॥ सद्भिः कीर्त्यमानं कृष्णचरितं
यस्य यशः सकृदप्याकर्ण्य मत्संगं त्यक्तुं न शक्नोति दर्शनादि किं पुनस्तस्मिन् इत्यादि कृष्णेन्यस्य ग्राह्यधीर्येयं पान्तं
=॥ आमन्त्र्य चास्य तु ज्ञातः परिषद्भ्याः सविवाद्यतं। आरुरोह रथं केचित्परिप्लुवोऽभिवादितः॥ पुत्रसंदीप
दीप्तान्तीविराटतनया तथा। गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्य
सुताद्यः॥ न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः॥ कीर्त्यमानं
यशो यस्य सकृदाकर्ण्य रोचनं। तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथं॥ दर्शनस्पर्शसंलापशय
नासनभोजनैः॥ सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः॥ वीक्षन्तः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह॥ न्यरुन्धन्
उद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते॥ निर्यात्यगाराक्नोऽभद्रमिति स्याद्बान्धवस्त्रियः॥ मृदंगशंखभेर्यश्च वीणा
पणवगोमुखाः॥ धुन्धुर्यानकघंटाद्या नेदुर्दुन्दुभयस्तदा॥
अनिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्र तत्रार्हणान्यस्य नाघ्र्यं चलन्ति स्म। यतः स्नेहेन सम्यग्बद्धाः। अत एवानन्तं अनु
आतालिहे ...नां स्त्रियेषां आगारान्निर्याति निर्गच्छति सति औत्कंठ्याद्धेतोः उद्गलद्बाष्पवत्वाद्बाष्पमश्रु कान्यरुन्धन्
ते न न्यरुन्धन्॥ तत्र हेतुः॥ अभद्रं नो स्यादिति अस्मंगलं मा भूदिति। तदर्थे मृदंगादयो दशवाद्यभेदाः॥

प्रेमव्रीडास्मितसर्वमीक्षणाय्यासाता॥ गुडाका निद्रा तस्या ईशो जितनिद्रो ऽर्जुनः। वदनेन्वामरेजगहस्तु
न स्तुवलि। श्रीकृष्ण॥ सत्याः श्रीकृष्णे तासामथ्य लिचारातो। किं त्वनात्तु रूपा श्च तास्त्व तु रूपा श्च निर्गुणस्यप
रमात्मस्य सुखीत्सवे व्यादयोऽनन्तु रूपाः गुणात्मनो मायोपनाद्यावतारे स्वरूपाश्च त्यर्थ॥ सर्वासांकृ
ष्णा मनोहरत्व पनिवदोऽपिरूर्मिमत्याः सत्याः तं संजल्पमस्यानंदत्रित्यर्थः॥ तत्र तेजसोदर्योद्यतिशये
नविस्मितास्याः सखीस्योऽन्याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति सवाशति
प्र० ११ भासामावशिखरारूढाः कुसुमनायेदि दृष्ट्वा यावदृष्टाः कुसुमैः कृष्णे प्रेमव्रीडास्मितेक्षणाः॥ सि
तासपद्मं जयाद्रसुक्तादामविरचितोरत्नदंडं गुडाकेशाः प्रियः प्रियतमस्य हारे स्तुवःसात्यकि श्चेव ४३
व्रजनेनपरमाद्भुताविकीर्यमाणाः कुसुमैरेजे मधुपतिः पथि श्रुयंताशिषः सत्यास्तत्र तत्रद्विजेरितः
न तुरूपा स्वरूपा श्च निर्गुणस्य गुणात्मनः॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां कौरवेंद्रपुर
स्त्रीणां सर्वश्रुतिमनोहरः॥ स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि॥ अग्रे गुणेभ्यो
जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु॥
वेषाणोकिलेतिप्रसिद्धप्रमाणाघोतनीयएक एवाद्वितीयः पुरुष आसीत्स एवायं श्रीकृष्णः॥ कुत्रासीत्तत्राह
विशेषआत्मनिनिः प्रपंचे निजरूपे। कदा अग्रे गुणेभ्यः गुणक्षोभात्पूर्वं तथा निशि प्रलये च। तस्य लक्षणं जगदात्म
जीवे निमीलितात्मनि निमीलितात्मन्निति सुप्तशक्तिषु तत्पदं जातादेक वचनं ईश्वरे लीन रूपेषु जीवेषु सत्स्वित्यर्थः।
जीवानां अहत्वात्कथं लयस्तत्राह सुप्ताशक्तिषु सतीषु जीवोपाधिरूपतत्त्वादि शक्तिलय एव जीवलय इ
त्यर्थः॥

ननु नामरूपविधानेन कथं पुरुषार्थप्राप्तिः शास्त्रकृता अयमभिप्रायः रूपनामानुविधानेन जीवः शास्त्रकृत्ये सवर्णादिना नरदेहो
(न वति तत् खित्र सृष्टिः ततो ज्ञानेनो मत्या मोक्षा लक्षणः पुरुषार्थः ... २ स्थितौ

तदेवं सृष्टेरादौ प्रलयानंतरं स्वनिः प्रपंचावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये प्रपंचावस्थानमाह ॥ स एव
व अयं प्रकृतस्वरूपस्थितिरेव प्रकृतिं अतः संसार अधितिष्ठति वा ॥ शृणु तत्र सृष्टिप्रवाहस्यानादित्वात्
क्रीडन्तीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायां मोहिनीं अत एव सिसृक्षतीं
सृष्टुमिच्छन्तीं ॥ किमर्थमत अनुससार अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् उपाधिसृष्ट्या जी
वानां भोगायेत्यर्थः ॥ कर्माणि च विधानं वेदात्मकं तदानित्याह ॥ शास्त्रकृदिति ॥ अस्य दर्शनमति दुर्लभम्
(उक्तार्थ...)

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं ॥ अनामरूपात्मनि रूपनामनी
विधित्समानोऽनुससार शास्त्रकृत् ॥ स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः ॥
पश्यंति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ फा· क्ला सादैवतं
२२

स्मात् किंच त्विमित्याह ॥ स वै अयं यस्य पदं स्वरूपं अंघ्रिं वा निर्जितो मातरिश्वा प्राणो यैः ॥ ब्रह्ममार्गे तेषु
ये एव पश्यंति ॥ केन भक्त्या उत्कलितं उत्कंठितोऽमलो य आत्मा बुद्धिस्तेन हे शणु तेन यथा बुद्धौ तिष्ठते ॥ बु
द्धि वेमत्व स्यात्ययमेव हे त्वरित्याह ॥ ननु हे सखि एवमेव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति न
तु योगादय इत्यर्थः ॥ यद्वा तु अहो एष सत्त्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेन अप्रत्यक्षीभवितुं नार्हति
२३ किंत्वनेन सहैव गंतव्यमित्यर्थः ॥ ननु हे सखे मनः शोधयितुमर्हति न नु अर्हत्येवा कर्मणा मलो
(ननु मनसा कथं मनः शुध्यतीति तत्राह कर्मणा न भवतीत्याह ॥ ननु ... सत्वे मनः
(तस्य अर्पणेन शोधकत्वमिति भावः ॥ ६

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ब्रह्म एव लोकमातेऽङ्ग ॥ हे सखे विधौ वेदे गुह्यरहस्यागमे श्रुव रहस्य निरूपकैः अनुगीतसत्कथः । अथ अनुगी-
तासु तस्याः कथा यस्य स एवार्यां गान प्रकारमाङ्ग ॥ य एक ईश इत्यादि । एवंभूतस्य नानावतारे कारणमाङ्ग ॥
यदा हीति तमो व्याप्ता धीर्येषां ते नृपाश्च अधर्मेण जीवंति केवलं प्राणाः इत्युक्तं तत्र तदा एष एव सत्वाय श्रिये
सत्वतः विशुद्धसत्वेन रूपाणि दधत् सगादीनि धत्ते प्रकटयति । युगे युगे तत्तद्वपुः रेखा सगं ऐश्वर्यं सत

२सर२

४८ सर्वाश्रयं सत्व्य अनुगीतसत्कथो वेदे गुह्येषु च गुह्यवादिभिः ॥ य एक ईशो जगदात्मलीलया
सृजत्यवत्यत्ति न तत्र सज्जते । यदा ह्यधर्मेण तमोधियो नृपा जीवंति तत्रैष हि सत्वतः किलाध
त्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे । अहो अलं श्लाघ्यतमं यदोः कुलं अहो ४८
अलं पुण्यतमं मधोर्वनं । यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चंक्रमणेन चांचति ॥
(प्रत्याशास्वीशाय मानं कर्म यत्र हतैस्मृतं । क्रियमाणं तु तत्कर्म सत्यमित्यभिधीयते २)

सत्यप्रतिश्रुत्वां ऋतं यथार्थोपदेशकत्वं दयां सर्वकृपां यशः अद्भुतकर्मत्वं विशेषतः श्रीकृष्णावतारस्योमा
पं वर्णयंति । अहो इति पंचभिः ॥ यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना यदोः कुलं अंचति पूजयति
सत्करोति अतः श्लाघ्यतमं तत्र चंक्रमणेन च मधोर्वनं मथुरां सत्करोति । अतस्तत्पुण्यतममिति । तमेवार्थं स्पष्ट
यन्नलं तातिशये अलमिति । तत्रापि आश्चर्ये अहो इत्युक्तं ।

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

चित्सुखेन पद्यमिदं व्याख्यातमस्ति। ६

आनर्त्तैः श्रूयमानस्य हरेर्निर्विशेषवंद्युतिः। एकादशे रतिः सम्यक्कथ्यते द्वेंद्रस्य वर्ण्यते॥ अत्र वेसद्वैत्यौरवद
चदद्यजनोरणां उल्लसद्गुल्लदीपालिखद्ध्वरं प्रवराविशत्॥ शश्चक्रहस्तमुद्धाशदरवरं पांचजन्यं शंखं दध्मौ।
वादितवान्॥ ततो यद्भयं तस्य नाशयावहं प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः औत्सुक्यं याः सतां॥ तत्र तत्र
रे. उपनीतबलयः पूजोपनीताः समर्पिताः बलयः उपायनानि याभिः॥ निरपेक्षे चित्तमिन्नादरेण समर्पणे दृष्टांतः॥ रवेर्दीपमि

श्रीसूत उवाच॥ आनर्तान्स उपव्रज्य स्वृद्धांजनपदान्स्वकान्॥ दध्मौ दरवरं तेषां विषादं शमय-
न्निव॥ स उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा॥ दाध्मायमानः करकंजसंपुटे यथा-
ब्जखंडे कलहंस उत्स्वनः॥ तमुपश्रुत्य निनदं जगद्भयभयावहं॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलाल-
साः॥ तत्रोपनीतबलयो रवेर्दीपमिवादृताः॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा॥ प्रीत्युत्फुल्लमुखाः प्रो-
चुर्हर्षगद्गदया गिरा॥ पितरं सर्वसुहृदमवितारमिवार्भकाः॥ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचिवै-
रिंच्यसुरेंद्रवंदितं॥ परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः॥ भवाय नस्त्वं भव विश्वभाव-
न त्वमेव माताथ सुहृत्पतिः पिता॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम॥

वेति पितरमर्भका इव तं सर्वसुहृदमवितारमूचुरित्यन्वयः॥ सुहृत्त्वेनैवावितारं न तु कामेन॥ अत्र हेतु-
रात्मारामं॥ तत्रापि हेतुः॥ परमानंदनिजस्वरूपलाभेनैव पूर्णकामं॥ विरिंचो ब्रह्मा वैरिंच्याः सनकादयः॥ इह संसा-
रे क्षेममिच्छतां परायणं॥ कुतः॥ परे ब्रह्मादीनां प्रभुरपि कालो यत्र न प्रभवेत्॥ अतः सदा यद्वा भवाय नोऽस्मा-
कं भव हे विश्वभावन॥ कृतिनः कृतार्था बभूविम जाता वयं॥ स उच्चकाशे दरः शंखः ध्मायमानः अतिशयेन
[illegible] इत्यन्वयः कथंभूतः धवलमुदरं य
[illegible]

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ऋता र्थत्वमेवाङ्ग॥ अहो भवता वयं सनाथाः स्मः। यद्यस्मात्तद्दरूपं पश्येम त्रिविष्टपानामपि दु र्दर्शनं यस्म
देवानामपि दुर्लभमित्यर्थः॥ ऐ मा स्मितं तदुक्तो ऐ स्मितं निरीक्षणं यस्मिन् तदाननं यस्मिन् तद्रूपं सर्वेषा
देहिनां नेत्राणां मङ्गलं यस्मिन्। अलकैः कवचं मन्द हास्ये मा ङ्ग॥ यद्धि यदा तो अंशुजाः कानो भवानितिपाठे नष्टानां
दृष्टीः अस्माननाहत्य अपसमार अपहाय जगाम। अक्रूरहस्तिनापुरं मधुरं समदुगांवा। तत्र तद्दर्शनं वि
यत्र३ / नी२
अहो सनाथा भवतास्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं। प्रेमस्मितस्निग्धनिरीक्षणाननं पश्ये
रूपमव सर्व सौभगं॥ यर्ह्यम्बुजाक्षाऽपससार भो भवान् कुरून्मधून्वाऽथ सुहृद्दिदृक्षया। तत्राब्दकोटि
प्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाऽच्युत॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः। शृण्वा
नोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं॥ मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः॥ आत्मतुल्यबलैर्गुप्तां
नागैर्भोगवतीमिव॥ सर्वर्तु सर्वविभव पुण्यवृक्षलताश्रमैः॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं॥
(वका ना न्मृका दी नां हृदि स्थितम चि)
नी२
वेनाओंध्याद रत्नोर्थ्या एवं तव नः त्वदीयानामस्माकमपीत्यर्थः॥ इति च एवं विधाः अन्या श्लोका विताभ्यः
शृण्वन् शाहदृष्ट्यामालिनं दीवलोकनेना ग्रहं कुर्वन् शौ द्वारकां प्रविवेशेति पंचभिः॥ मधुभोजदशार्हाद्यैर्गुप्तां र
क्षितां सर्वेषु ऋतुषु सर्वे विभवा पुष्पादि संपदो येषां तेषु पुण्यवृक्षाः लताश्रमाः लतामंडपाश्च येषु तैः उद्यानादिभि
स्तोयपद्माकराः सरांसि तैः श्रीः शोभा यस्यां तां। उद्यानं फलप्रधानोपवनं पुष्पप्रधानं। आरामः क्रीडार्थवनं।

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

ोपुरं पुरद्वारं द्वारं गृहद्वारं कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां गरुडादिचिह्नांकिताः ध्वजाः स
द्वर्णपत्रांकिताः पताकाः। चित्राणां ध्वजपताकानामग्रैः अंतः प्रतिहत आतपो यस्यां संमार्जितानि निर्मा
र्गे मरजस्कानि महामार्गादीनि यस्यां। महामार्गा राजमार्गाः रथ्या इतरमार्गाः। आपणकाः पण्यवीथ्यः। चत्व
राण्यंगनानि। फलादिभिर्दिग्धांश्च अवकीर्णां प्रेष्यमाणां तां निशम्य श्रुत्वा वसुदेवादयः। प्रत्युज्जग्मुरिति चतुर्थे

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां चित्रध्वजपताकाग्रैरंतःप्रतिहतातपां। संमार्जितमहामा
र्गरथ्यापणकचत्वरां सिक्तां गंधजलैर्हृष्टां फलपुष्पाकृतांकुरैः। द्वारि द्वारि गृहाणां च दध्यक्षतफले
क्षुभिः। अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः। निशम्य प्रेष्यमाणां तां वसुदेवो महामनाः। अक्रूर
श्चोग्रसेनश्च रामश्चाद्भुतविक्रमः। प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः। प्रहर्षवेगोच्छ्वसित
शयनासनभोजनाः। वारणेंद्रं पुरस्कृत्य ब्राह्मणैः सर्वमंगलैः। शंखतूर्यनिनादेन ब्रह्मघोषेण चा
दृताः। प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः। वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः। लसत्कुं
डलनिर्भातकपोलवदनश्रियः।

वयः। प्रहर्षवेगेन उच्छ्वसितानि उल्लंघितानि शयनादीनि यैः। ससर्वमंगलैः इत्यंतः वारणेंद्रं मंगलार्थं पुरस्कृताः
। सर्वमंगलैः शुभमंगलपुष्पादिपूर्णपाणिभिः। ब्रह्मघोषो मंत्रपाठः। प्रणयेन स्नेहेन आगतं साध्वसं संभ्रमो ये
। वारमुख्या नर्तक्यः प्रत्युज्जग्मुः। अयुतानि चेति तत्र कारस्य वं दिन श्रेत्यन्वयः। लसत्कुंडलैर्निर्भातानि या
पोलानि तैर्वदने श्रीर्यासां ता वारमुख्याः वेश्याः।

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

यस्य मु[illegible]खं सर्व प्राणिनां हृ सा
सौंदर्यामृत पानाय पात्रं १

नटाः स्वरमालिनश्चतुराः॥ तालाद्यनुसारेण नृत्यंतो नर्तकाः॥ गंधर्वा गायकाः॥ सूताः पौराणिकाः॥ मागा
धा वंशशंसकाः॥ बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः॥ ते सर्वे गायंति चेति चकारस्यान्वयः॥ यथाविधि
यैः सह यथोचितं तैस्तथा समागम्य सर्वेषां मानं कृतवानित्यर्थः॥ तदाह प्रह्वेति॥ प्रह्वत्वं शिरसा नतिः॥
अभिवादनं वाचा नतिः॥ आश्वास्य आसयं दत्वा श्वपाकानप्यभिव्याप्य वरैः अभीष्टदानैश्च मानं कृतवान् अश्व

२१ नटनर्तकगांधर्वाः सूतमागधवंदिनः॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च॥ भगवांस्तत्र बंधू
नां पौराणामनुवर्तिनां॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मि
तेक्षणैः॥ आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि॥ आ
शीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाविशत्पुरं॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः॥ हर्म्याण्यारु ५१
रुहुर्विप्र तदीक्षणमहोत्सवाः॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसां॥ न वितृप्यंति हि दृशः॥ म ङ्गोः
श्रियो धामांगमच्युतं॥ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां॥ बाहवो लोकपालानां सारंगाणां पदांबुजं॥
[illegible] दिदृक्षा॥ तस्येक्षणे महोत्सवो यासां॥ यद्यपि तं नित्यं सदा अच्युतं निरीक्षमाणानामपि दृशो न तृ
प्यंति अत आह अंगं॥ कथं भूतं॥ श्रियः शोभाया धाम स्थानं॥ अंगं यस्य तं॥ एतदेवाभिनयेनाह॥ श्रियो लक्ष्म्या यस्योरः
[illegible] वक्षः॥ निवासः॥ यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रं॥ यस्य बाहवो लोकपालानां निवासः॥
[illegible]यंतीति सारंगाः भक्तास्तेषां यस्य पदांबुजं निवासः॥ निरीक्षमाणानां दृशां इति पूर्वेणान्वयः॥

यस्य बाहवो लोकपालानां
निवास

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

आर्यां तं प्रतिदर्शनात्सर्वमात्मनात्तुष्यापरिरेभिरे ततो हर्षितैः ततः समीपमागतमात्मजैः पुत्रैः गृहीतकं वस्मा
लिंगा यत्प्रस्वस्वयमालिंगितैरित्यर्थः। अत्र हेतुः। दुरंतभावाः गंभीराः सरित्प्रायाः। तदा च तासां नेत्रयोः निरु
द्धमप्यश्रुवाष्पं वैक्लव्यात्स्वैवश्यात् आश्रवत् ईषत्स्रुतं स्रावः। अतएव धैर्यहान्या विलज्जतीनां हे स्पष्टव
र्य चित्रं स्पष्टमिति। पार्श्वं गतः समीपस्थः। तत्रापि रहो गतः एकांते प्रवर्तते स्मा पदे पदे प्रतिक्षणं नवं नवमेव

स्वरूपोपक्षयाय एकवचनम्

तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं। निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जती
नां भृगुवर्य वैक्लवात्॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं। पदे पदे का
विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित्॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृ
त्ततेजसां। विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः॥ स एष नरलोकेऽस्मिन्नवती
र्णः स्वमायया। रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा।

अत्र केचित्त्वन्यायः का विरमेतेति। चलापि चंचलस्वभावापि। उक्तं श्रीकृष्णचरितं संक्षिप्याह एवमिति द्वाभ्यां।
क्षितेर्भाराय जन्म येषां। अक्षौहिणीभिः [illegible] परिवृत्तं सर्वतः प्रवृद्धं तेजः प्रतापो येषां। श्वसनो वायुर्वेणूनाम
न्योन्यसंघर्षेणानलं विधाय मिथो दाहेन यथोपशाम्यति तद्वत्॥ स्त्रीरत्नकूटस्थः उत्तमस्त्रीकदंबस्थः॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

नेस ३५

= सितातपत्रव्याजनेनेरूपछतोमंडितः॥ अर्कमंडलतुल्येन छत्रेण सहितः शंखं ऽच्छायापरिमंडलं वृत्तं तद्वैषु नविपुर्लैः शोभि
तः॥ अर्कमंडलस्योपमानं नक्षत्राणि पुष्पवृष्टेः चंद्रः परिभ्रमः छत्रमंडलाकारयोश्चामरव्यजनयोः चायंवृत्तमाला
याः॥ विद्युल्लेखा विशंगवासः सो ऽद्भुतोपमेयं यदि घनस्योपरि स्थितं ये विविंव तत्र लपत स्वं डौ सर्वतोन तत्राणि ऽस्यैव चनि
लिंचापद्वयं स्थिरं विद्युल्लेखा यदि स्यात् तर्हि सघनो यथा स्यात् तथा हरिर्बभाविति अर्थः॥ देवकीप्रसूतः ऽस्मा
नचंद्र इति मातृसौंदर्यादिगुणविशेषज्ञापनार्थं उक्तः॥ अष्टादशापि वस्तु देवस्य तत्र यो मातृत्वे ऽत्वात्तन्नमस्काराय एव

= सितातपत्रव्यजनेनैरूपछतः प्रसूनवर्षैरभिवर्षितः पथि॥ पिशंगवासा वनमालया बभौ घनो यथा ऽऽर्कः
चुपचापवैकृतैः॥ अविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः॥ ववंदे शिरसा सप्त देवकीप्रमुखा मुदा॥
पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः॥ हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः॥ अथा ऽविशत्स्वभवनं स
र्वकाममनुत्तमं॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजा
तमनोमहोत्सवाः॥ उत्तस्थुरारात्सहसा ऽऽसनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः॥

सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयं॥ प्रोष्यदेशांतरे उषित्वा आगतं दूरादेव विलो
क्य संजातो मनसि महोत्सवो यासां ताः॥ आसनादाशयाद् [illegible] ताः॥ प्रोष्य देशांतरे उषित्वा आगतं दूरादेव
विलोक्य संजातो मनसि महोत्सवो [illegible] ऽऽसनाद् देहेन उत्तस्थुः॥ आशयो ऽंतःकरणं तस्माद् प्यात्मनोत्तस्थुः॥ श्री कृष्ण दे
नात्मनः संश्लेषे ऽंतःकरणमवधानमपि नासहंतेत्यर्थः॥ व्रीडितानि लोचनानि आननानि च यासां॥ अपांगैरेव वीक्ष
णाद् व्रीडितलोचनाः अवनतमुखत्वाद् व्रीडिता
ननाः॥ साकं व्रतैरिति॥ हास्यक्रीडावर्जनादिनियमाः अपि ताभ्य उत्तस्थुरित्यर्थः॥ इति व्रताएवोत्तस्थुरिति वा व्रतानि
नयानामवलंब्येनोक्तानि॥ क्रीडोशरीरसंस्कारसमाजोत्सवदर्शनानि हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृकेति॥

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

= अहो बत अस्या आश्चर्यं किं तत् कुशस्थली द्वारका स्वर्गा उत्कृष्टं इति यश तस्य स्वस्य तिरस्कारी परिभवकर्त्री भुवः

पुण्ययशस्करी लीलावती। यद्यतः यत् अस्याः सर्वाः प्रजाः श्री अनुग्रहेणाईक्षितं प्रेक्षितं तं स्मितपूर्वावलोकं यद्वानु

ग्रहार्थमीक्षितं दृष्टं स्वस्यात्मनः पतिं श्रीकृष्णं नत्वा पिबन्ति दिवहेह मात्र पतिं नित्यं पश्यंति स्म ते धिक्तामि

ति पादे स्वा अनुग्रहार्थं सुपितं कृतनिवासं नैतत् स्वर्गे स्वीयार्थः॥ हे सखि अस्य गृहीतपाणिभिः पत्नीभिः इदं

तो यमेव तृष्णं नूनं व्रतस्नानेन समर्चितः यस्मिन्न धरामृते आशयश्चित्तं यासां ताः संमोहं प्राप्ता इति मनो द्व

= अहो बत स्वर्यशस्तिरस्कारी कुशस्थली पुण्ययशस्करी भुवः॥ पश्यंति नित्यं यदनुग्रहेषितं स्मि न

तावलोकं स्वपतिं स्म यत्प्रजाः॥ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः॥ पि

बंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः॥ या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य

चैद्यप्रमुखान्हि शुष्मिणः॥ प्रद्युम्नसांबांबसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः॥ एताः प

यति १ रं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृ

तिभिर्हृदि स्पृशन्॥

वसुदेवकं एतत् पंचं। या इति द्वाभ्यां। वीर्यं बलं वा एव शुल्कं मूल्यं तेन शुष्मिणः बलिष्ठा शाल्वप्रद्युम्नसांबवसु आंबसु

ताया सा रुक्मिणी जांबवती नाग्नजिती नामा आदिर्यासां सत्यभामादीनां ताः याश्चापरा अस्पष्टश्लोकस्योत्तमश्लोकेना

हृताः एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते अपास्तं पेशलं नष्टं स्वातंत्र्यं यस्मात्तत् निरस्तं शौचं शुचित्वं य

स्मात् तथाभूतमपि जातु कदाचिदपि नापैति न निर्गच्छति। आहृतिभिः व्याहारैः॥ यद्वा पाणिजाता दिव्यवस्त्राहृतैः

हृदि स्पृशन् आनंदयन्॥

दिवः स्पृशती
न स्मात्

CC-0 Punjab University Chandigarh. An eGangotri-Vaidika Bharara Initiative

एवंविधाः स्त्रियो गिरः सस्मितेन निरीक्षणेनाभिनंदन् अहरिर्ययौ मधुद्विषोऽपि गोपीथाय रक्षणाय प्रेरिता
रेभ्यः शत्रुभ्यः शंकितः सन् प्रायुंक्त हस्त्यश्वरथपादातं सेनां गोपायेत् चतुर्विधसमिच्चैवं चतुरंगिणी पृतनां से
पांडवः कुरुवंशजत्वात् पांडवा अपि कौरवाः नवतामेशः प्रिये सुहृद्वा इति सुहृदः तेऽत्र कुरुदेशात् गर्भा
वक्रमात् अत्र न विवक्षिताः मध्य निदृद को देशः धन्वोऽल्पोदकः आनर्त्तो द्वारकादेशः सौवीर उपांत्य

३६ एवंविधा गदंतीनां स गिरः पुरयोषितां निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ अजातशत्रुः पृत
नां गोपीथाय मधुद्विषः परेभ्यः शंकितः स्नेहात् प्रायुंक्त चतुरंगिणीं ॥ अथ दूरागतान् शौरिः कौरव्यान् वि
रहातुरान् संनिवर्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥ कुरुजांगलपांचालान् शूरसेनान् सयामु
नान् ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् आनर्त्ता
न् भार्गवोपागात् श्रांतवाहो मनाग्विभुः ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ॥ सायं भेजे दिशं पश्चा
द्गविष्ठो गां गतस्तदा ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमोऽध्यायः ॥ ॥

आनर्त्तान् ॥ हे भार्गव मनाक् ईषत् श्रांतवाहाः यस्य सः ॥ तत्र तत्र देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितानि अर्ह
णानि उपायनानि यस्मै सः ॥ सायं अपराह्णे पश्चाद्दिशं पश्चिमां दिशं भेजे प्राप्तः तदा गविष्ठः स्वर्गस्थः सूर्यः गां गतः एवं
गतः प्रविष्टः अस्तं गत इत्यर्थः ॥ अस्तो नाम पर्वतानं दे त्यापः सायं प्रविशतीति श्रुतेः यद्वा तदा सायंकाले गा तेर
पादवतीर्य गविष्ठः स्तो मोक्षितः ततः गां जलाशये गतः सन् पश्चाद्दिशं संध्यां भेजे उपासितवानित्यर्थः ॥ अथ मे दशम

नोवाक्दृष्टीनां वृत्तिभिः परमात्मानं श्रीकृष्णे अंतरे वलीनः आसीद्यस्य सः॥ निष्कले निःस्वरूपे ब्रह्मणि संपद्यमानं नि
लितो आज्ञाय आलक्ष्य देवैर्मानवैश्च वादिताः॥ राज्ञां मध्ये साधवः अनघ्नय ख॥ निर्हरणादीनि संस्कारादीनि
सम्यक् कृतपरेतस्य कृष्णस्यापीत्यर्थः॥ पितरं दृष्ट्वा तराद्धं तपस्विनी संतापवती॥ राजा युधिष्ठिरः॥ प्रथमेन वपुः॥
॥ श्रीसूत उवाच॥ ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः॥ आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपार
मत्॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥ तत्र दुंदुभयो
नेदुर्देवमानववादिताः॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः॥ तस्य निर्हरणादीनि संपरेतस्य भार्ग
व॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत्॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः॥ ततस्ते
कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं॥ पितरं सान्त्वयामास गांधा
रीं च तपस्विनीं॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः॥ ॥
इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरराज्यप्रलंभो नाम नवमोऽध्यायः॥ ॥ शौनक उवाच॥
हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः॥ सहानुजैः प्रत्यवरुद्धभोजनः कथं प्र
